## || श्रीहनुमद् दिव्यकवचस्तोत्र ||

॥ विनियोगः ॥

श्रीहनुमद् दिव्यकवचस्तोत्रस्य अनुष्टुप्छन्दः । श्रीराम ऋषिः । श्रीहनुमान्देवता । आञ्जनेयेतिशक्तिः । वातात्मजेति दैवतं बीजं । श्रीहनुमानिति मन्त्रः । मर्कटाडिति कीलकं । वज्रकायेति कवचं । बलवानिति योनिः । दंष्ट्रायुधेति अस्त्रं । श्री हनुमान देवता प्रसन्नार्थे मम रक्षणार्थे च पाठे विनियोग: !

॥ हृदयादि न्यासः ॥

अञ्जनीसूनवे नमः इति हृदये ।
रुद्ररूपाय नमः शिरसे स्वाहा ।
वायुसुतायेति शिखायै वषट् ।
अग्निगर्भाय नमः कवचाय हुं ।
रामदूताय नमः नेत्रत्रयाय वौषट् ।
ब्रह्मास्त्रस्तम्भनायेति अस्त्राय फट् ॥

॥ अथ ध्यानम् ॥

ध्यायेद्बालदिवाकरद्युतिनिभं देवारिदर्पाऽपहं
देवेन्द्रप्रमुखं समस्तयशसं देदीप्यमानं रुचा ।
सुग्रीवादि समस्तवानरयुतं सुव्यक्ततत्त्वप्रियं
संरक्तारुणलोचनं पवनजं पीताम्बरालङ्कृतम् ॥ ११॥

॥ अथ दिग्बंधनम् ॥

**प्राच्यां वज्रतनुः पातु आग्नेय्याम् अग्निनाजितः ।**
**याम्यां पात्वञ्जनीपुत्रो शोकघ्नः पिङ्गलेक्षणः ॥ १२॥**

**नैऋत्यां पातु दैत्यघ्नो वारुण्यामब्धिलङ्घनः ।**
**वायव्यां वायुजः पातु प्रयत्नेनोत्तरादिशः ॥ १३॥**

**पातु लक्ष्मणशोकघ्नो गमनः सर्वदा महान्।**
**ऐशान्यामीशसं पातु पातु यत्नेन नान्यथा ॥ १४॥**

**ऊर्ध्वमूर्धाऽऽत्मनः पातु अधः पातालसाधकः ॥ १५॥**

॥ अथ कवचम् ॥

त्रिशिरोघ्नः शिरः पातु भालं भालेक्षणः प्रभुः ।
कर्णौ पात्विप्रकर्णस्यास्तथाक्षिण्यक्षसंहरः ॥ १६॥ ?

हनुमान्मे हनू पातु नासिकां ध्रमनासिजित् । ?
चतुर्वक्त्रहरो वक्त्रं पातु दन्तानि सर्वदा ॥ १७॥

शूलदंष्ट्राजितः पातु जिह्वायां दैत्यजिह्वहा ।
भुजौ भुजायुधः पातु स्कन्धौ मे सन्धिकारकः ॥ १८॥

अङ्गुलीः पातु रामस्य वर्णाङ्गुलियधारकः ।
नखान्नखायुधः पातु स्कंकिनीभञ्जतस्तनौ ॥ १९॥ ?

वक्षः पात्वश्मवक्षःघ्नो महोदरहरोदरम् ।
केसरीनन्दनो मध्यं पातु पूर्वं प्रयत्नतः ॥ २०॥

नाभिं पातु सदा पद्मनाभश्च निजशक्तिमान्।
पृष्ठं पातु रणे पृष्ठं नादेयः सर्वदा हितः ॥ २१॥

गुदं रक्तगुदः पातु गुह्यं गुह्यस्त्वलिङ्गकः ।
ऊरू पात्वहितस्योरुभञ्जनो ग्रामसत्वरः ॥ २२॥

स्थूलं जङ्घाख्यसंहारः पातु मे जङ्घयोर्द्वयोः ।
दैत्यानां शीर्षविन्यस्तपादः पात्वनिशं पदौ ॥ २३॥

यत्नेन सर्वकर्माणि मर्मज्ञः पातु सर्वदा ।
रक्तरोमाह्वयध्वंसी रोमकूपानि पातु मे ॥ २४॥

अन्हि पात्वहितावध्यः रात्रौ रात्रिजयाधिकः ।
स न्ध्यां सन्धानकारण्यां रामायानीय दत्तवान्।
सङ्ग्रामे तु महामोहान्सर्वदा सर्वतो जय ॥ २५॥

**जले ग्रहहरः पातु वने लङ्कावनान्तकृत् ।**
**स्थले भीमाग्रजः पातु गिरौ गिरिवनेश्वरः ॥ २६॥**

**सङ्ग्रामे बलवान्पातु अग्नौ लङ्काविदाहकः ।**
**गृहे मां पातु सर्वत्र कदलीवनमन्दिरः ॥ २७॥**

हनुमत्कवचं यस्तु पठेद्विद्वान्विचक्षणः ।
तत्फलं पुरतः सर्वं वक्ष्यामीह मुनीश्वर ॥ २८॥

इति श्रीसुदर्शनसंहितायां हनुमन्कवचं सम्पूर्णम् ॥

**विधि –** सात्विक आहार विहार का पालन करते हुए इस श्री हनुमान कवच का 1100 पाठ करने से सिध्द हो जाता है ! सिध्द होने पर इसे एक कागज पर सिंदूर और अनार की लेखनी से लिखकर कवच में भरकर पहनना चाहिए ! रोगी को अभिमंत्रित जल से छींटे मारते हुए कवच पढना चाहिए ! इससे समस्त प्रेत बाधा दूर होती है ! शुध्दता और पवित्रता का विशेष ध्यान रखें|

**–स्वामी रुपेश्वरानंद**

**https://swamirupeshwaranand.in/** आश्रम वेबसाइट

https://www.youtube.com/c/SwamiRupeshwaranand युट्यूब चैनल